**March 2019** **Reg. No. ....................................** **FY 18**

**Name ........................................**

## Part - III

## SANSKRIT SAHITYA

Maximum : 80 Scores

Time : **2½** Hours
Cool off time : **15** Minutes

***General Instructions to Candidates :***

- There is a 'Cool off time' of 15 minutes in addition to the writing time.
- Use the 'Cool off time' to get familiar with questions and to plan your answers.
- Read the instructions carefully.
- Read the questions carefully before answering.
- Calculations, figures and graphs should be shown in the answer sheet itself.
- Give equations wherever necessary.
- Electronic devices except nonprogrammable calculators are not allowed in the Examination Hall.

**I.** अध: प्रदत्तानां प्रश्नानाम् उत्तराणि पेटिकाया: चित्वा लिखत । **(4 × 1 = 4)**

| | | |
|---|---|---|
| विश्वभानु: | भास: | उपमालङ्कार: |
| धर्मसागर: | सीताम् | अर्थान्तरन्यासालङ्कार: |

क) हनूमान् अशोकवनिकायां काम् अपश्यत्?

ख) स्वामी विवेकानन्दस्य चरितमवलम्ब्य रचितं काव्यं किम्?

ग) कर्णभारस्य कर्ता क:?

घ) हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् – अत्र अलङ्कार: क:?

**II.** अध: प्रदत्तानां प्रश्नानामुत्तराणि कोष्ठकात् चित्वा लिखत । **(4 × 1 = 4)**

क) 'सिंहकारकमूर्खब्राह्मणकथा' कस्मात् ग्रन्थात् स्वीकृतं भवति?

(पञ्चतन्त्रात्, रामायणात्, महाभारतात्)

ख) 'वसुधैव कुटुम्बकम्' इति केषां चिन्ता भवति?

(लघुचेतसां, उदारचरितानां, बालानां)

ग) 'वयस्य ननु त्वमपि जानासि दुरात्मना कंसेन मम षट् पुत्रा: निधनमुपनीता: कस्य वचनमिदम् ।'

(वसुदेवस्य, नन्दगोपस्य, रोहिण्या:)

घ) सर्वलघु क: गण:?

(मगण:, भगण:, नगण:)

**III.** अध: प्रदत्तयो: (क), (ख) प्रश्नयो: **एकस्य** उत्तरं लिखत । **(6)**

क) प्रदत्तं गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

महाकाव्यानि संस्कृत साहित्यस्य सर्वोत्कृष्टरत्नानि भवन्ति । संस्कृतवाङ्मये पञ्चमहाकाव्यानि प्रसिद्धानि भवन्ति । तेषां मध्ये रघुवंशकुमारसम्भवयो: कर्ता: भवति कालिदास: । तस्य पाण्डित्यं नैपुणीं च निरुप्य अनुवाचकै: स: कविकुलगुरु: इति प्रोच्यते । तस्य अभिज्ञानशाकुन्तलस्य व्यापनेन कालिदास: 'इण्ड्यन् षेक्सपीयर्' इत्यपरनाम्नैव प्रकीर्त्यते । रघुवंशस्य इतिवृत्तं रामायणात् स्वीकृतं तथा कुमारसम्भवस्य इतिवृत्तं पद्मपुराणात् च भवति ।

**प्रश्न :**

1) संस्कृतसाहित्यस्य सर्वोत्कृष्टानि रत्नानि कानि?

2) संस्कृतसाहित्ये कति महाकाव्यानि सन्ति?

3) कविकुलगुरु: क:?

4) रघुवंशकुमारसम्भवयो: कर्ता क:?

5) 'इण्ड्यन् षेकस्पीयर्' इत्यपरनाम्ना प्रसिद्ध: कवि: क:?

6) रघुवंशस्य इतिवृत्तं कस्मात् स्वीकृतम्?

ख) अध: प्रदत्तां सूचनामनुसृत्य डा. के. एन. एषुत्तच्छन् महाशयस्य जीवनचरितं संक्षिप्य लिखत ।

**सूचना :** * जीवनकाल: (1911–1981)

* पट्टाम्बिदेशीय: ।
* लक्ष्मियम्मा कृष्णन् एषुत्तच्छन् चास्य पितरौ ।
* प्रमुख: कृति: भवति केरलोदय: ।

**IV.** यथोचितं योजयत । **(5)**

| | | | |
|---|---|---|---|
| a) | रामपाणिवाद: | i) | विश्वभानु: । |
| b) | पि. के. नारायणपिल्ला | ii) | मुकुन्दमाला । |
| c) | शक्तिभद्र: | iii) | केरलोदय: । |
| d) | डा.के.एन.एषुत्तच्छन् | iv) | लीलावती । |
| e) | कुलशेखर: | v) | आश्चर्यचूडामणि: । |

**V.** अध: प्रदत्तयो: प्रश्नयो: **एकस्य** उत्तरं लिखत । **(6)**

क) अध: प्रदत्तसूचनानुसारं हनुमता दृष्टा सीतामधिकृत्य **एकं** लघूपन्यासं लिखत ।

**सूचना :** * पुन: पुन: निश्वसन्ती ।

* दु:खपरायणा ।
* राक्षसीनां तर्जनम् ।

ख) अध: प्रदत्तं पेटिकां पठित्वा चत्वारि वाक्यानि आरचयत ।

| **क** | **ख** | **ग** |
|---|---|---|
| रामायणम् | अस्यकाव्यस्य | भवति । |
| वाल्मीकि: | उत्तम मातृका | रचयिता । |
| रामस्य अयनं | आदिकाव्यं | व्यवह्रियते । |
| साहोदर्यस्य | रामायणमिति | दृश्यते । |

**VI.** अधः प्रदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत । **(5)**

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥

क) सन्तः किं भजन्ते ?

ख) मूढः कीदृशः भवति ?

ग) श्लोकस्याशयं स्ववाक्यैः लिखत ।

**VII.** उदाहृतानुसारं पदच्छेदं लिखत । **(3 × 1 = 3)**

क) उदाः - रामः + तु → रामस्तु ।

-- + -- → एकस्तु ।

ख) उदा. - तथा + एव → तथैव ।

-- + -- → वसुधैव ।

ग) उदा. - कुतः + च → कुतश्च ।

-- + -- → ततश्च ।

**VIII.** उदाहृतानुसारं विग्रहं लिखत । **(4 × 1 = 4)**

उदा. अन्यो देशः = देशान्तरम् ।

................ = ग्रामान्तरम् ।

................ = पुस्तकान्तरम् ।

................ = राष्ट्रान्तरम् ।

................ = नामान्तरम् ।

**IX.** भवत: इष्टतमश्लोक: क: इति सकारणं लिखत । **(5)**

क) गते विरामं गरुडध्वजेऽस्मिन्
मखेषु सर्वत्र निवारितेषु ।
सुरेषु सर्वेष्वपि दुर्बलेषु
हस्ते भविष्यत्यमरावती न: ।।

ख) मखाश्च तत्प्रीतिकरा निवार्या
निवारणीया श्रुतिरग्रिमाऽपि ।
तृणीकृताशेष जगत्प्रभावा
संस्तौति या तन्महिमानमेव ।।

ग) यस्मिन् भवत्याश्रितवत्सलत्वं
विप्रेषु यस्यास्ति विशेषसङ्ग: ।
मनोहरं यश्च विभर्त्ति रूपं
वधं स बालोर्हति मत्सकाशात् ।।

**X.** अध प्रदत्तं कथास्तम्भं पाठभागानुसारं क्रमीकुरुत । **(5)**

* तेषां मार्गमध्ये एकस्य सिंहस्य अस्थिपञ्जराणि ते अपश्यन् ।
* सिंह: उत्थाय तं व्यापादितवान्, बुद्धिमान् तु वृक्षमारुह्य स्वप्राणान् अरक्षत् ।
* चत्वारो ब्राह्मणपुत्रा: गुरुकुलवासानन्तरं भूपतीन् परितोष्य अर्थोपार्जनं कर्तुं यतन्ते ।
* तेषु शास्त्रपण्डिता: मिलित्वा तं सिंहं सजीवमकरोत् ।
* तेषु त्रय: शास्त्रपारंगता:, एक: प्रायोगिक बुद्धिमान् च अभवन् ।

**XI.** अध: प्रदत्तयो: प्रश्नयो: **एकस्य** उत्तरं लिखत । **(1 × 8 = 8)**

क) अध: प्रदत्तं सूचकानुसारं अमात्यान् प्रति कंसस्य वचनानि लिखत ।

**सूचका :**
* भगिन्या: सुता: हता ।
* मम शत्रु: विष्णु: एव ।
* शत्रो: निवारणाय यतध्वम् ।
* हस्ते भविष्यत्यमरावती न: ।

ख) सुकुमारकवे: रचनाशैलीमधिकृत्य सूचनानुसारमेकम् उपन्यासं लिखत ।

**सूचका :**
* सुकुमारकवे: गुरुकुलवास: ।
* श्रीकृष्णविलासकाव्यस्य रचना ।
* कवे: कृष्णभक्ति: ।
* चमत्कारसौन्दर्यम् ।

**XII.** अध: प्रदत्तं पद्यांशं पठित्वा 'गोरस' इति पदस्य अर्थभेदं लिखत । **(2 × 1 = 2)**

''विना गोरसं को रसो भोजनानाम्
विना गोरसं को रसो भूपतीनाम् ।।''

**XIII.** अध: प्रदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत । **(4 × 1 = 4)**

यस्य षष्ठी चतुर्थी च
विहस्य च विहाय च ।
अहं कथं द्वितीया स्यात्
द्वितीयस्यामहं कथम् ।।

अहं इति ............ कथं स्यात् । यस्य, विहस्य इति .........., विहाय इति .......... च भवति तस्य पुरुषस्य अहं ........... कथं स्याम् ।

**XIV.** 'क' विभागे दत्तानाम् आशयानां समानार्थक श्लोक पादान् 'ख' विभागात् चित्वा लिखत । **(2)**

**'क'**

1) राजा स्वराज्ये एव पूज्यते किन्तु पण्डिता: सर्वत्र ।

2) यागस्य दानस्य च फलं सर्वदा तिष्ठति ।

**ख**

1) मूढः परप्रत्ययनेयबुद्धिः ।

2) स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।

3) हुतं च दत्तं च तथैव तिष्ठति ।

**XV.** अध: प्रदत्तान् सम्भाषणांशान् प्रादेशिकभाषया परिवर्तयत । **(5)**

देवकी : क्व इमं नेष्यति?

वसुदेव : अहमपि न जाने ।

देवकी : वयं किं कुर्म:?

वसुदेव : यत्र दैवं विधास्यति तत्र बलं गृहीत्वा अपक्रमामि ।

देवकी : आर्यपुत्र! इच्छाम्येनं सुदृष्टं कर्तुम् ।

**XVI.** अध: प्रदत्तान् आशयान् पठित्वा निर्देशानुसारम् उत्तराणि लिखत । **(2 × 2 = 4)**

1) अध: प्रदत्तं पद्यभागं पठित्वा – लघुगुरू विवेचनं कुरुत ।
'जातो ममायं विषद: प्रकामम्'

2) अध: प्रदत्तस्य श्लोकभागस्य गणविवेचनं कुरुत ।
'अथ वारिणि धोरतरं फणिनं'

**XVII.** अध: प्रदत्तमलङ्कारं सलक्षणं व्याख्यात । **(4)**

'उपमा'

**XVIII.** अध: प्रदत्तं श्लोकं पठित्वा दानस्य महत्त्वमधिकृत्य **एकां** टीकां लिखत । **(4)**

शिक्षा क्षयं गच्छति कालपर्ययात्

सुबद्धमूला निपतन्ति पादपाः ।

जलं जलस्थानगतं च शुष्यति

हुतं च दत्तं च तथैव तिष्ठति ।।